12

1075CH12

अशुद्धिसंशोधनम्

अध्यापक: — 'तुम सब पुस्तक पढ़ो' – अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादं कुरुत।

(छात्रा: विचिन्तयन्ति)

अध्यापक: — कृतम् किम्?

(छात्रा: विचारमग्ना:)

अध्यापक: — उमेश! भवान् वदतु।

उमेश: — यूयं पुस्तकं पठन्तु।

अध्यापक: — 'यूयं पुस्तकं पठन्तु' इति अशुद्धं वाक्यम्। अमित! उत्तिष्ठ। शुद्धं करोतु।

अमित: — यूयं पुस्तकं पठत।

अध्यापक: — अतिसुन्दरम्। एतद् एव शुद्धं वाक्यम्।

छात्रा: — आम्।

अध्यापक: — संस्कृते बहूनि कारणानि भवन्ति यै: वाक्यानि अशुद्धानि भवन्ति।

(किञ्चित् विरम्य)

अध्यापक: — किं भवन्त: जानन्ति अशुद्धय: कियत्य: भवन्ति। पश्यन्तु

(अध्यापक: श्यामपट्टे लिखति।)

1. कर्तृक्रिययो: अशुद्धय:—

अशुद्धम् वाक्यम्		**शुद्धम् वाक्यम्**
(i) त्वं पाठं पठति।	—	त्वं पाठं पठसि।
(ii) ते लेखं लिखति।	—	ते लेखं लिखन्ति। (पुल्लिङ्गे)
		ते लेखं लिखत:। (स्त्रीलिङ्गे)
(iii) वयं भोजनं खादामि।	—	वयं भोजनं खादाम:।

© NCERT not to be republished

(iv) यूयं बहि: गच्छ। — यूयं बहि: गच्छत।

(v) त्वं लेखं लिखतु। — त्वं लेखं लिख।

(vi) युवां भोजनं खादताम्। — युवां भोजनं खादतम्।

(vii) आवां खेलनाय गच्छाम:। — आवां खेलनाय गच्छाव:।

(viii) अहं तत्र गमिष्याम:। — अहं तत्र गमिष्यामि।

(ix) स: एव बुद्धिमान् सन्ति। — स: एव बुद्धिमान् अस्ति।

(x) तौ उपवने क्रीडाव:। — तौ उपवने क्रीडत:।

(xi) ता: भोजनं पचति। — ता: भोजनं पचन्ति।

2. विशेषणविशेष्ययो: अशुद्धय:—

(i) चतुर: बाला: वदन्ति। — चतुरा: बाला: वदन्ति।

(ii) एक: कन्या एव एवं वदति। — एका कन्या एव एवं वदति।

(iii) नील: गगनं शोभते। — नीलं गगनं शोभते।

(iv) कुशला बाला: एव प्रश्नं पृच्छन्ति। — कुशला: बाला: एव प्रश्नं पृच्छन्ति।

(v) मधुरं फलानि खाद। — मधुरं फलं खाद।

(vi) कुशल: बाला एव स:। — कुशल: बाल: एव स:।

(vii) सुन्दराणि चित्रं स: रचयति। — सुन्दराणि चित्राणि स: रचयति।

(viii) तत् फलानि मधुराणि सन्ति। — तानि फलानि मधुराणि सन्ति।

(ix) ते बालिका: बुद्धिमत्य: सन्ति। — ता: बालिका: बुद्धिमत्य: सन्ति।

3. लिङ्गसम्बन्धि–अशुद्धय:—

(i) ते मम मित्रा: सन्ति। — तानि मम मित्राणि सन्ति।

(ii) फला: करण्डके सन्ति। — फलानि करण्डके सन्ति।

(iii) वृक्षाणि हरिता: सन्ति। — वृक्षा: हरिता: सन्ति।

(iv) उपवने पुष्पा: सन्ति। — उपवने पुष्पाणि सन्ति।

(v) शाखेषु खगा: सन्ति। — शाखासु खगा: सन्ति।

(vi) देवालयासु देवा: वसन्ति। — देवालयेषु देवा: वसन्ति।

© NCERT not to be republished

(vii) उपवन: सुन्दरम् अस्ति। — उपवनं सुन्दरम् अस्ति।

(viii) वन: अतिविस्तृतम् अस्ति। — वनम् अतिविस्तृतम् अस्ति।

(ix) खगानि आकाशे उड्डयन्ते। — खगा: आकाशे उड्डयन्ते।

(x) राधाया: ग्रीवम् शोभना अस्ति। — राधाया: ग्रीवा शोभना अस्ति।

4. वाच्यसम्बन्धि–अशुद्धय:—

(i) स: पाठ: पठ्यते। — तेन पाठ: पठ्यते।

(ii) तेन फलानि खाद्यते। — तेन फलानि खाद्यन्ते।

(iii) त्वम् लेख: लिख्यते। — त्वया लेख: लिख्यते।

(iv) त्वया ग्रन्थान् पठ्यन्ते। — त्वया ग्रन्था: पठ्यन्ते।

(v) त्वया भोजनं करोषि। — त्वया भोजनं क्रियते।

(vi) मया पाठा: स्मरामि । — मया पाठा: स्मर्यन्ते ।

(vii) तया कार्यं क्रियन्ते । — तया कार्यं क्रियते ।

(viii) अहं नियमा: पाल्यन्ते। — मया नियमा: पाल्यन्ते।

(ix) राधया गीतं गायति। — राधा गीतं गायति।

(x) अमितेन प्रात: उत्तिष्ठति। — अमितेन प्रात: उत्थीयते।

5. उपपदसम्बन्धि–अशुद्धय:—

(i) सीता रामस्य सह वनम् अगच्छता। — सीता रामेण सह वनम् अगच्छत्।

(ii) स: ग्रामस्य प्रति गच्छति। — स: ग्रामं प्रति गच्छति।

(iii) राधा मात्रे सदृशी अस्ति। — राधा मात्रा सदृशी अस्ति।

(iv) पिता पुत्रे क्रुध्यति। — पिता पुत्राय क्रुध्यति।

(v) स: अश्वेन पतति। — स: अश्वात् पतति।

(vi) स: विद्यालयेन आगच्छति। — स: विद्यालयात् आगच्छति।

(vii) वयं ग्रामे गमिष्याम:। — वयं ग्रामं गमिष्याम:।

(viii) बालक: कुक्कुरेण बिभेति। — बालक: कुक्कुरात् बिभेति।

(ix) पिता पुत्राय विश्वसिति। — पिता पुत्रे विश्वसिति।

(x) माता पुत्रीं स्निह्यति। — माता पुत्र्यां स्निह्यति।

not to be republished © NCERT

6. वचनसम्बन्धि–अशुद्धय:—

(i) स: पाठं पठन्ति। — स: पाठं पठति ।

(ii) वयं लेखं लिखामि। — वयं लेखं लिखाम:।

(iii) त्वं कुत्र गच्छथ। — त्वं कुत्र गच्छसि।

(iv) ते पाठं स्मरति। — ते पाठं स्मरन्ति।

(v) यूयं तत्र गच्छतम्। — यूयं तत्र गच्छत।

(vi) सर्वे शक्तिमन्त: अस्ति । — सर्वे शक्तिमन्त: सन्ति।

(vii) त्वया सर्वाणि कार्याणि करणीयम्। — त्वया सर्वाणि कार्याणि करणीयानि।

(viii) ता: कन्या: तत्र अस्ति। — ता: कन्या: तत्र सन्ति।

(ix) तौ बालकौ गच्छति। — तौ बालकौ गच्छत:।

(x) ते बालिके पठन्ति । — ते बालिके पठत:।

7. संख्यासन्बन्धि–अशुद्धय:—

(i) त्रय: बालिका: वार्तालापं कुर्वन्ति। — तिस्र: बालिका: वार्तालापं कुर्वन्ति।

(ii) चत्वार: बालिका: क्रीडन्ति। — चतस्र: बालिका: क्रीडन्ति।

(iii) एका पुरुष: कार्यं करोति। — एक: पुरुष: कार्यं करोति।

(iv) त्रीणि सैनिका: देशं रक्षन्ति। — त्रय: सैनिका: देशं रक्षन्ति।

(v) पञ्चा: बालका: पठन्ति। — पञ्च बालका: पठन्ति।

(vi) द्वे बालकौ खादत:। — द्वौ बालकौ खादत:।

(vii) त्रय: पुस्तकानि सन्ति। — त्रीणि पुस्तकानि सन्ति।

(viii) एक: पात्रं तत्र अस्ति। — एकं पात्रं तत्र अस्ति।

(ix) त्रीणि पुरुषा: एव कार्यं कुर्वन्ति। — त्रय: पुरुषा: एव कार्यं कुर्वन्ति।

(x) चत्वार: कन्या: प्रसीदन्ति। — चतस्र: कन्या: प्रसीदन्ति।

8. अन्या: अशुद्धय:—

(i) राधा श्व: गच्छति । — राधा श्व: गमिष्यति।

(ii) बालक: ह्य: गच्छति । — बालक: ह्य: अगच्छत्।

(iii) भवान् किं कथयसि । — भवान् किं कथयति।

© NCERT not to be republished

(iv) रमा श्व: करोति। — रमा श्व: करिष्यति।

(v) स: ह्य: न पठति। — स: ह्य: न अपठत्।

अभ्यासः

1. अधोलिखितानि वाक्यानि शुद्धानि कुरुत —

(i) वयं चित्रं पश्यन्ति। ....

(ii) भवान् भोजनं खाद। ....

(iii) त्वं पाठं स्मरतु। ....

(iv) स: पीत: वस्त्रं धारयति। ....

(v) त्रीणि वृक्षा: तत्र शोभन्ते। ....

(vi) ता: महिला: न गमिष्यति। ....

(vii) त्वम् किं क्रियते। ....

(viii) पिता श्व: आगच्छति। ....

(ix) युष्माभि: किं पठन्ति। ....

(x) स: तत्र न सन्ति। ....

(xi) अमितेन एतत् कार्यं करोति। ....

(xii) यूयं तत्र न गन्तव्यम्। ....

(xiii) मया एतानि फलानि खादितव्यम्। ....

(xiv) कन्या: पाठं पठति। ....

(xv) अम्बा भोजनं पचन्ति। ....

(xvi) तेन भोजनं खादनीयानि। ....

(xvii) अम्बा तत्र सन्ति। ....

(xviii) त्वम् जलं पानीयम्। ....

(xix) ते लेखान् लिखति। ....

(xx) अस्माभि: फलानि खाद्यते। ....

© NCERT not to be republished